# Shri Shastrijimaharaja Pranama Ashtakam

# શ્રીશાસ્ત્રિજીમહારાજ પ્રણામાષ્ટકમ્

## Document Information


Text title : Shri Shastrijimaharaja Pranama Ashtakam

File name : shAstrijImahArAjapraNAmAShTakam.itx

Category : deities_misc, svAminArAyaNa, gurudev, aShTaka

Location : doc_deities_misc

Author : jeThAlAla

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીશાસ્ત્રિજીમહારાજ પ્રણામાષ્ટકમ્

(શાર્દૂલવિક્રીડિતમ્)
વૈરાગ્યેણ દૃઢેન બાલ્યવયસિ ત્યક્ત્વા ગૃહં બાન્ધવાન્
અન્વિષ્ટાચ્ચ સુતોષિતાચ્ચ ગુરુતો વિજ્ઞાનમાસાદ્ય ચ ।
સદ્બોધેન વિમોચયસ્યનુગતાન્ દેશે મુમુક્ષૂનટન્
પૂજાર્હં પ્રણમામિ યજ્ઞપુરુષં શાસ્ત્રપ્રવીણં મુદા ॥ ૧॥

શુશ્રૂષાં કૃતવાન્ ગુરોરગણયન્ પ્રાગ્જેરુપાધીન્ બહૂન્
સેવાયા અચલં વ્રતં ધૃતવતા ભીતં ન કસ્માદપિ ।
આજ્ઞાં પાલયતાનુભૂતમતુલં શારીરકષ્ટં ગુરોઃ
પૂજાર્હં પ્રણમામિ યજ્ઞપુરુષં શાસ્ત્રપ્રવીણં મુદા ॥ ૨॥

શાસ્ત્રં જીવણરઙ્ગતઃ શ્રુતવતા વેદાદિ તાભ્યાં ત્વયા
સાકાર-પ્રકટેશ્વરાક્ષરપતે-રધ્યાપિતોપાસના ।
શાસ્ત્રાર્થા વિહિતાઃ સભાસુ વિજિતા વાદૈઃ પ્રતિસ્પર્ધિનઃ
પૂજાર્હં પ્રણમામિ યજ્ઞપુરુષં શાસ્ત્રપ્રવીણં મુદા ॥ ૩॥

કારુણ્યેન વસુન્ધરાં હરિવરો યુક્તોઽક્ષરેણાયયૌ
આજ્ઞા શ્રીહરિણા કૃતા પ્રથયિતું ભક્તિં હરેરીદૃશીમ્ ।
આજ્ઞાં પાલયતા દુરાગ્રહવતાં સોઢાસ્ત્વયોપદ્રવાઃ
પૂજાર્હં પ્રણમામિ યજ્ઞપુરુષં શાસ્ત્રપ્રવીણં મુદા ॥ ૪॥

શ્રીબોચાસણધામ-રમ્યાસિક્તાઃ પૂતાઃ પદૈઃ શ્રીહરેઃ
સઙ્કલ્પો વિહિતસ્ત્વયાક્ષરપતે-મૂર્તિપ્રતિષ્ઠાપને ।
ભક્તેભ્યેઽક્ષરમન્દિરં રચયતા પ્રૌઢં મહો દર્શિતં
પૂજાર્હં પ્રણમામિ યજ્ઞપુરુષં શાસ્ત્રપ્રવીણં મુદા ॥ ૫॥

શ્રદ્ધાયુક્ત-મુમુક્ષુરેત્ય શરણ કુર્યાદ્ ભવત્સેવનાં
સન્તાપાંસ્ત્રિવિધાન્નિવાર્ય સકલાન્ ભૂયાદ્ ભવાન્ શાન્તિદઃ ।
દેહો ભક્તહિતાર્થમેવ ભવતા બ્રહ્માર્પિતો ધાર્યતે

પૂજાર્હં પ્રણમામિ યજ્ઞપુરુષં શાસ્ત્રપ્રવીણં મુદા ॥ ૬॥

ધર્મજ્ઞાન-વિરાગભક્તય ઇમે એકાન્તિકાનાં ગુણાઃ
ચત્વારશ્ચ ભવન્તિ પઞ્ચમમિદં શુશ્રૂષણં શ્રીહરેઃ ।
શ્રેયસ્કારિગુણાઃ હરેર્મુનિવરં ત્વાં ભૂષયન્તેઽખિલાઃ
પૂજાર્હં પ્રણમામિ યજ્ઞપુરુષં શાસ્ત્રપ્રવીણં મુદા ॥ ૭॥

નામોચ્ચારમહિત્વમેવ મલિનં સઙ્કલ્પમાખણ્ડતે
કિઞ્ચાન્તઃશરણં પ્રશામયતિ યત્ સંસારચક્રાનલાન્ ।
યત્પાદામ્બુજલોલુપા હરિજના ગાયન્તિ શુભ્રં યશ-
સ્તસ્મિન્ યજ્ઞપુરુષદાસ-ચરણે પ્રીત્યા નમસ્યાસ્તુ મે ॥ ૮॥

ઇતિ શ્રીજેઠાલાલસ્વામિનારાયણવિરચિતં શ્રીશાસ્ત્રિજીમહારાજ
પ્રણામાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Shastrijimaharaja Pranama Ashtakam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*